मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा
सा देवतेति ॥ १.११.८॥

अन्नमिति होवाच सर्वाणि ह वा इमानि भूतन्यन्नमेव
प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता
तां चेदविद्वान्प्रत्यहरिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य
मयेति तथोक्तस्य मयेति ॥ १.११.९॥

॥ इति एकादशः खण्डः ॥

अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा
मैत्रेयः स्वाध्यायमुद्वव्राज ॥ १.१२.१॥

तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वान
उपसमेत्योचुरन्नं नो भगवानागायत्वशनायामवा
इति ॥ १.१२.२॥

तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको दाल्भ्यो
ग्लावो वा मैत्रेयः प्रतिपालयांचकार ॥ १.१२.३॥

ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः सꣳरब्धाः
सर्पन्तीत्येवमाससृपुस्ते ह समुपविश्य
हिं चक्रुः ॥ १.१२.४॥

ओ३मदा३मों३पिबा३मों३ देवो वरुणः
प्रजपतिः सविता२न्नमिहा२हरदन्नपते३ऽन्नमिहा
२हरा२हरो३मिति ॥ १.१२.५॥

॥ इति द्वादशः खण्डः ॥

अयं वाव लोको हाउकारः वायुर्हाइकारश्चन्द्रमा
अथकारः । आत्मेहकारोऽग्निरीकारः ॥ १.१३.१॥

आदित्य ऊकारो निहव एकारो विश्वे देवा
औहोयिकारः प्रजपतिर्हिंकारः प्राणः स्वरोऽन्नं या

लो३कद्वारमपावा३र्णू ३३ पश्येम त्वा वयꣳ
रा ३३३३३ हु ३ म् आ ३३ ज्या ३ यो ३ आ ३२१११
इति ॥ २.२४.४॥

अथ जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते
लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक
एतास्मि ॥ २.२४.५॥

अत्र यजमानः परस्तादायुषः स्वाहापजहि
परिघमित्युक्त्वोत्तिष्ठति तस्मै वसवः प्रातःसवनꣳ
सम्प्रयच्छन्ति ॥ २.२४.६॥

पुरा माध्यंदिनस्य
सवनस्योपाकरणाज्जघनेनाग्नीध्रीयस्योदङ्मुख
उपविश्य स रौद्रꣳ सामाभिगायति ॥ २.२४.७॥

लो३कद्वारमपावा३र्णू३३ पश्येम त्वा वयं
वैरा३३३३३ हु३म् आ३३ज्या ३यो३आ३२१११इति ॥ २.२४.८॥

अथ जुहोति नमो वायवेऽन्तरिक्षक्षिते लोकक्षिते
लोकं मे यजमानाय विन्दैष वै यजमानस्य लोक
एतास्मि ॥ २.२४.९॥

अत्र यजमानः परस्तादायुषः स्वाहापजहि
परिघमित्युक्त्वोत्तिष्ठति तस्मै रुद्रा
माध्यंदिनꣳ सवनꣳ सम्प्रयच्छन्ति ॥ २.२४.१०॥

पुरा तृतीयसवनस्योपाकरणाज्जघनेनाहवनीयस्योदङ्मुख
उपविश्य स आदित्यꣳ स वैश्वदेवꣳ सामाभिगायति ॥ २.२४.११॥

लो३कद्वारमपावा३र्णू३३पश्येम त्वा वयꣳ स्वारा
३३३३३ हु३म् आ३३ ज्या३ यो३आ ३२१११ इति ॥ २.२४.१२॥

आदित्यमथ वैश्वदेवं लो३कद्वारमपावा३र्णू३३ पश्येम
त्वा वयꣳ साम्रा३३३३३ हु३म् आ३३ ज्या३यो३आ ३२१११
इति ॥ २.२४.१३॥

अथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो
दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय

